BHARATI INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY
RESEARCH & DEVELOPMENT (BIJMRD)
(Open Access Peer-Reviewed International Journal)
DOI Link : https://doi.org/10.70798/Bijmrd/03010038
Available Online: www.bijmrd.com|BIJMRD Volume: 3| Issue: 01| January 2025| e-ISSN: 2584-1890

# शिक्षणसन्दर्भे विद्यालयप्रशिक्षुतायाः आवश्यकता
# (Importance of School Internship in the Perspective of Teaching)

**Asit Kumar Jana**

Principal, National Sanskrit University
Email: kumarasit19@gmail.com

**शोधसारः(Abstract)**

*विद्यालयप्रशिक्षुतायाः सम्बन्धः क्षेत्रेण सह परियुक्तनाम्नः मुख्यपाठ्यचर्यात्मकक्षेत्रस्य अंशरूपेण वर्तते, अपि च अभिकल्पनयोजनाः, व्यावसायिकक्षमता, अध्यापकप्रभावनीयताः, कौशलेषु कस्यचित् व्यापकसंग्रहस्य विकासं प्रति अग्रेसरं करिष्यति। शिक्षाशास्त्रस्य पाठ्यचर्या अध्येतारः अपि च विद्यालयाः यत्र सततं व्यापकं च मूल्याङ्कनं सम्मिलितं वर्तते। एतेन सह दीर्घीकृतायाः अविच्छिन्नायाः च परियुक्तेः प्रदानमपि भविष्यति, येन वर्षं यावत् प्रतिवेशिषु विद्यालयैः सह सहक्रिया सम्भवा भविष्यति। इमे क्रियाकलापाः प्रथमे वर्षे चतुर्षु सप्ताहेषु आयोक्ष्यन्ते। पाठ्यक्रमस्य अन्तिमवर्षे सक्रियरूपेण शिक्षणे छात्राणां प्रवृत्तिः भविष्यति। इत्येदं स्तरद्वये प्रवृत्तं भविष्यति। अर्थात् उच्चप्राथमिककक्षा (कक्षा VI-VIII) तथा माध्यमिककक्षा (कक्षा IX-X) अथवा उच्चमाध्यमिककक्षा (कक्षा XI-XII) इत्यादीषु कक्षासु इमे कार्यक्रमाः न्यूनातिन्यूनं सप्ताहान् यावत् माध्यमिकोच्चमाध्यमिककक्षासु भविष्यन्ति। उपरि कथितम् अस्ति यत् द्विवर्षात्मककार्यक्रमे विद्यालयेषु प्रशिक्षुता न्यूनातिन्यूनं 20 सप्ताहानां भविष्यति। (प्रथमवर्षे चतुरः सप्ताहान् यावत्, द्वितीये वर्षे षोडश सप्ताहान् यावत्)। अत्र शिक्षणाभ्यासम् अतिरिच्य एकं सप्ताहं यावत् प्रारम्भिकप्रावस्थायाः अवसरः भविष्यति, यस्मिन् अवधौ छात्राध्यापकः सामान्यकक्षायां नियमिताध्यापकस्य अध्यापनस्य प्रेक्षणं करिष्यति। इदम् अतिरिच्य अभ्यासपाठानां समकक्षीयं प्रेक्षणमपि सम्मिलितं भविष्यति।*

**कूटशब्दाः(Keyword):** *Teacher Education, School Internship, Quality, General Teaching Competence, Teaching practices, B.Ed. etc.*

**उपोद्घातः(Introduction)**

कस्यचित् कार्यविशेषस्य ज्ञानाय व्यक्तिविशेषः नियोजितः भवति। इदमेव प्रशिक्षुता इत्युच्यते। कस्यचित् छात्रस्य प्रचलितशिक्षाव्यवस्थायाम् आदौ तत्त्वस्य अवगमनं भवति। तत्त्वावगतेः अनन्तरं यदा प्रायोगिकज्ञानाय स नियोजितो भवति ततः एव तस्य प्रशिक्षुतायाः प्रारम्भः भवति। ततः सः तस्मिन् कर्मणि स्वकुशलतायाः परीक्षां प्रदाय यदा उत्तीर्णः भवति तदा तस्मै तस्य कर्मकुशलतायाः प्रमाणस्वरूपं प्रमाणपत्रं दीयते। अस्य उदाहरणत्वेन चिकित्साक्षेत्रं वक्तुं शक्यते। अस्मिन् क्षेत्रे विद्यार्थी आद्यौ चिकित्साविषयकाणां तात्त्विकांशानाम् अध्ययनं समापयति। ततः सः परीक्षां प्रदाय उत्तीर्णः भवति। ततः तेन संवत्सरात्मकः कालः प्रशिक्षुतारूपेण स्थातव्यं भवति। यदा सः कालः अतिकान्तः भवति तदा सः चिकित्सकरूपेण स्वकर्मजीवनम् अतिवाहयति। विविधयान्त्रिकशिक्षाप्रतिष्ठानस्य विद्यार्थिनः कस्मिंश्चित् प्रतिष्ठाने

वाणिज्यशाखायाः विविधविषये कस्मिंश्चित् वाणिज्यिकप्रतिष्ठाने प्रशिक्षुतारूपेण कार्यं करोति। ततः सः तस्मिन् क्षेत्रे उत्तीर्णः सन् स्वकर्मजीवनं प्रविशति। एवमपि दृश्यते यत् कश्चित् विद्यार्थी कस्मिंश्चित् उद्योगे नियोजितः सन् कश्चित् कालांशं(षण्मासं, संवत्सरं वा) सः स्वयं कार्यं कृत्वा तद्विषये निपुणतां सम्पादयति। ततः तेन उद्योगे अर्थात् स्वकर्मजीवने प्रवेशः कर्तव्यः। तथैव शिक्षाप्रतिष्ठानेष्वपि। कश्चित् विद्यार्थी विद्यालयस्य शिक्षाजीवनं (प्राथमिकशिक्षस्य कृते उच्चमाध्यमिकस्तरम् उत्तीर्णः) समाप्य अथवा विश्वविद्यालयस्य शिक्षाजीवनं (माध्यमिकस्तरे किञ्च उच्चमाध्यमिकस्तरे शिक्षकस्य कृते स्नातकम् अथवा स्नातकोत्तरम् उत्तीर्णः) समाप्य अध्यापकरूपेण प्रवेशात् प्राक् अथवा औद्यगिकजीवने प्रवेशात् परं केभ्यश्चित् दिवसेभ्यः परं पाठप्रदानस्य शिक्षां सम्प्राप्य स्वयं कार्यं कर्तव्यम्। कस्मिंश्चित् विद्यालये पाठप्रदानेनैव अयं पाठप्रदानस्य अनुभवः तेन प्राप्तव्यः। कर्मजीवनस्य इयं पद्धतिः एव विद्यालयप्रशिक्षुता इत्युच्यते। अनेन प्रकारेण तेन आदौ तेन प्रशिक्षुतायां प्रमाणपत्रं प्राप्तव्यं ततः सः विद्यार्थी विद्यालये शिक्षककर्मणि कर्तव्यपालने उपयुक्तो भवति।

### विद्यालयप्रशिक्षुताविषये सम्प्रत्ययः (Concept of School Internship)

प्रत्येकं वृत्तिसम्बन्धीयः कार्यावलीम् इव, शिक्षकशिक्षायाः कर्तव्यसूचौ field engagement इति अत्यन्तम् आवश्यकम् उपादानमस्ति। विद्यालयस्य शिक्षक-विद्यार्थिनोः सहावस्थानेन एव अध्यापकशिक्षायाः व्यवहारिकं ज्ञानं जायते। कस्मिंश्चित् विद्यालये कानिचन दिनानि कर्मस्थितिशीलतायां संयोगः एव विद्यालयप्रशिक्षुता अथवा School Internship इत्युच्यते। विद्यालयप्रशिक्षुतायां कर्तव्यकर्मानुष्ठानेन भाविशिक्षकस्य अथवा प्रशिक्षणरतस्य सम्भावितशिक्षकस्य शिक्षासम्बन्धी अनुभवः जायते। किञ्च तस्य तस्मिन् क्षेत्रे कुशलता जायते। विद्यालयस्य विविधकार्येषु यदा आत्मनियोगः भवति तदा तस्य शिक्षाकर्मणि आवश्यकर्तव्येषु विषयेषु सद्बुद्धिः जायते। वस्तुतस्तु शिक्षकशिक्षायाः पाठ्यक्रमस्य इदं तादृशम् उपादानं यत् प्रशिक्षणरतं शिक्षकं भाविशिक्षकं वा विद्यार्थिनः सुदक्षकर्तव्यनिष्ठशिक्षकरूपेण परिवर्तने महद् उपकारकं भवति। येन सः विद्यालयपरिस्थितौ एकः सुदक्षः, कर्तव्यपरायणः दायित्वशीलः शिक्षकः भवति।

अद्यतनी या आधुनिकी शिक्षाव्यवस्था तस्याः क्रेन्द्रे अवस्थाय स्वशिक्षणस्य धारणा, स्वप्रज्ञा किञ्च शिक्षणाध्ययने निर्मितिवादस्य नूतना दृष्टिः। एतैः विषयैः सह अध्यापकशिक्षाया भाविशिक्षकरूपेण प्रशिक्षणरतशिक्षकरूपेण वा परिचाययितुं प्रत्यक्षम् अवकाशं लभते। प्रशिक्षणरतः शिक्षकः ज्ञानार्जनविषये ज्ञानायत्तीकरणे किञ्च ज्ञाननिर्मातृरूपेण अवतरणे साहाय्यं करोति। प्रशिक्षुतायां अन्तर्गता कर्मसूचिः भाविशिक्षकाय अथवा प्रशिक्षणरतशिक्षकाय शिक्षायाः विविधतात्विकांशानां शिक्षाविज्ञानसम्बद्धानां विषयानां च ज्ञाने यथा अवकाशं ददाति तथैव अनुशीलने अर्थात् चर्चायामपि अवकाशं ददाति। अतः एव विद्यालयस्य वर्तमानावस्थायां प्रशिक्षणरतः शिक्षकः भाविकालेऽपि सम्पूर्णरूपेण कार्यं कर्तुं सक्षमः भवति।

### परिवर्तिते प्रेक्षिते विद्यालयप्रशिक्षुता (School Internship: Changing Scenario)

भारतवर्षे विद्यालयप्रशिक्षुता कर्मसूचौ केभ्यश्चित् दिवसेभ्यः पूर्वम् एकः परिवर्तितः अवस्थायाः जन्म जातम्। पूर्वं शिक्षकशिक्षायाम् एवं दृश्यते स्म यत् पूर्वनिर्दिष्टाः केचन पाठटीकाम् आश्रित्य शिक्षणानुशीलनम्(Practice teaching) भवति स्म। विविधविषयः पद्धतिराधारेण पाठटीकासमूहाः रचिताः भवन्ति स्म। NCTE Regulation, 2009 अभ्यासशिक्षणम् अथवा Practice teaching इत्यस्य विषयं विस्तार्य कार्यं कर्तुं भारं ददाति। अतः भाविशिक्षकाय विद्यालयस्य विविधकार्यस्य ज्ञानार्थं माहात्म्यं दीयते। ततः, राष्ट्रियशिक्षकशिक्षापरिषदः 2014 नियमानुसारेण(NCTE Regulation, 2014) इत्यत्र पुनः Field Engagement इत्यस्मिन् विषये अत्यन्तं माहात्म्यं प्रदाय प्रशिक्षुतायां समयपरिसरं वर्धयित्वा विंशतिसप्ताहात्मकं कर्तुम् अनुरोधः कृतः। प्राथमिकशिक्षकशिक्षणस्य यथा D.El.Ed किञ्च माध्यमिकशिक्षकशिक्षणसूचौ(B.El.Ed.), शिक्षाशास्त्रि(B.Ed.) इत्यादौ अपि प्रशिक्षुताकालं विंशतिसप्ताहात्मकं कर्तुम् अनुरोधः कृतः। इदं पुनः विंशतिसप्ताहस्य Field Engagement इति द्विधा विभक्तः। एकः सप्ताहचतुष्टयात्मकः द्वितीयः षोडशसप्ताहात्मकः। वर्षद्वयात्मकः यः शिक्षकशिक्षायाः कालः तस्य प्रथमे वर्षे सप्ताहचतुष्टयात्मकः कालः किञ्च द्वितीये वर्षे षोडशसप्ताहात्मकः कालः प्रशिक्षुता। यद्यपि अस्य समयपरिसरस्य परिवर्तनम् अग्रे भविष्यति इति श्रूयते।

NCTE Regulation 2014 इत्यत्र विद्यालयप्रशिक्षुतायां(School Internship) समयपरिसरः अधः उपस्थाप्यते- **Bachelor of Education(B.Ed.)**

**NCTE Regulation 2014 इत्यत्र विद्यालयप्रशिक्षुतायां (School Internship) समयपरिसरः**

| Sl. no | | 1st Year | 2nd Year | Total |
|---|---|---|---|---|
| 1 | Internship Duration | 2 weeks ($2^{nd}$ Sem.) | 18 weeks ($3^{rd}$ Sem.) | 20 weeks |
| 2 | Total Programme Credit | 40 | 40 | 80 |
| 3 | Internship Credits | 4 | 16(14+2) | 20 |
| 4 | Total Marks assigned | 1000 | 1000 | 2000 |
| 5 | Marks assigned for Internship | 100 | 400 | 500 |
| 6 | Weightage in terms of credits | 10% | 40% | 25% |
| 7 | Weightage of Internship in terms of marks | 10% | 40% | 25% |

**Source:** NCTE Guide line of 2016

अस्य आशा क्रियते यत् प्रशिक्षुता(Internship) समाप्य कश्चित् प्रशिक्षुशिक्षकः (Intern teacher) भाविकाले वास्तवपरिस्थितौ विद्यालये पूर्णशिक्षकरूपेण सर्वविधं कर्तव्यं पालयितुं स्वात्मानं सः सशक्तं कर्तुं शक्नोति। अस्यां च विस्तृतायां दीर्घकालसाध्यायां प्रशिक्षुतायाः महतः सम्पदः (अर्थस्य, समयस्य श्रमस्य च) प्रयोजनं भवति। अस्याश्च सम्पदः उपयोगे विशिष्टः सुसम्बद्धः प्रक्रिया-विशेषः आश्रयणीयः येन प्रशिक्षुतायां सार्थक्यं लभेत। प्रत्याशितस्य फलस्य निश्चयार्थं प्रशिक्षुतायां परिकल्पनं निर्माणं च अधो वर्णितानां नीतिसमूहानां सम्पादनं कर्तव्यम्।

**विद्यालयप्रशिक्षुता सङ्घटनस्य नीतिसमूहः(Principles for Organization of School Internship) :**

**NCTE SCHOOL INTERNSHIP: FRAMEWORK AND GUIDELINES** इत्यत्र विद्यालयस्य विद्यालयप्रशिक्षुतानिर्माणाय याः नीतयः अनुसरणीयाः ताः अधः क्रमेण संक्षेपेण उपस्थाप्यन्ते-

(i) यदा निर्दिष्टे विद्यालये प्रशिक्षणरतस्य शिक्षकस्य छात्राध्यापकस्य (Student-Teachers) वा नियोगः क्रियते तदा प्रथमवर्षस्य द्वितीये सत्रे Internship इति अथवा प्रशिक्षुता अनुभवसिद्ध्यर्थं चत्वारः सप्ताहाः दीयन्ते। अयं यः सप्ताहचतुष्टयात्मकः प्रशिक्षुताकालः तत्र विद्यालयस्य विविधानि कार्याणि भवन्ति। यथा- विद्यालयस्य परिदर्शनम्(School visit), कक्ष्या पर्यवेक्षणम् (Classroom observation), स्वं समूहरूपेण च निर्दिष्टस्य कार्यस्य कर्तव्यपालनम्(individual and group assignment), द्वितीयवर्षे षोडशसप्ताहात्मकः कालः केवलं विद्यालयप्रशिक्षुतायां कृते एव भवति(full time school internship)। सप्ताहद्वयं सामाजिकं कार्यं (community work) कर्तव्यम्। ततः सप्तसु सप्ताहेषु अभ्यासशिक्षणं भवति(practice teaching) किञ्च अवशिष्टेषु सप्त सप्ताहाः विद्यालयसम्बद्धकार्यार्थं (School based activities) भवन्ति।

(ii) छात्राध्यापकस्य(Student-Teacher) अथवा प्रशिक्षोः शिक्षकस्य (intern teacher) विद्यालये पूर्णकालिकशिक्षकरूपेण आह्वानं कृत्वा नियोगः क्रियते। एतैः प्रशिक्षुभिः शिक्षकैः विद्यालयस्य प्रधानशिक्षकस्य अर्थात् अध्यक्षस्य उपदेष्टृशिक्षकस्य (Mentor Teacher) च मार्गदर्शनेन विद्यालयस्य प्रशिक्षुतायां कर्मानुभवः लब्धव्यः। विद्यालये यथा पूर्णकालिकशिक्षकैः कर्तव्यकर्म क्रियते तथैव एतैः प्रशिक्षुताशिक्षकैः अपि तत् तत् कर्म कर्तुं प्रयत्नः कर्तव्यः। किञ्च तेभ्यः

विद्यालयस्य विविधकार्यपालनाय यथा पर्यवेक्षणं, भागग्रहणं किञ्च विद्यालयस्य सदस्यवत् अवसरः देयः। एतत् सर्वं कार्यं कदाचित् विद्यालयस्य पाठ्यक्रमः अथवा पाठ्यसहगामीक्रिया, यत्किञ्चित् भवितुम् अर्हति।

(iii) विद्यालयप्रशिक्षुता(school internship) केचन उच्चयोग्यतासम्पन्नाः किञ्च ये इच्छुकाः शिक्षकाः उपदेष्टृशिक्षकत्वेन(Mentor Teacher) चेतव्याः अथवा नियोक्तव्याः। एकस्मिन् शिक्षावर्षे त्रयाणां चतुर्णां वा शिक्षार्थिशिक्षकाणां (student-teacher) कृते कश्चित् उपदेष्टृशिक्षकः(Mentor Teacher) नियोक्तुं शक्यते। चिह्निताः ये उपदेष्टृशिक्षकाः तेषां सम्प्रसारितशिक्षकशिक्षायाः शिक्षकसदस्य-त्वेन विविच्य तेषां कृते पृथक् प्रशिक्षणस्य व्यवस्थापनं कर्तुं शक्यते येन सम्पदः अपचयः यथा न स्यात्। एतेषाम् उपदेष्टृशिक्षकाणां कालावधिः निर्धारणीयः।

(iv) शिक्षकशिक्षायाः अनुभवार्थं सामान्यतया शिक्षकाः विविधावस्थाविशिष्टेषु विद्यालयेषु यथा सर्वकारीयविद्यालये असर्वकारीयविद्यालये, नगरस्य ग्रामस्य च विद्यालये नियोगार्थं आहूयन्ते। एकैकः शिक्षकः एकैकस्यां परिस्थितौ अवसरं प्राप्नोति। किन्तु अत्र अवधानं देयं यत् प्रशिक्षणरतशिक्षकस्य कृते सर्वकारीये, असर्वकारीये एवं सर्वविधेषु विद्यालयेषु पाठप्रदानस्य अनुभवः यथा स्यात्। ते अवश्यं नगरप्रदेशेषु, ग्रामप्रदेशेषु, आदिवासिप्रदेशेषु च विद्यमानेषु विद्यालयेषु प्रशिक्षुतारूपेण नियुज्य शिक्षकशिक्षायाः अध्ययनं सम्पूर्णं कुर्युः।

(v) प्रशिक्षुता कृते ये विद्यालयाः चीयन्ते तेषु शिक्षकशिक्षा प्रतिष्ठानस्य प्रायोगिकविद्यालयः(Lab school) अथवा प्रशिक्षुताविद्यालयः(Internship School) इत्येवंरूपेण विवेचितः भवति। एतेन शिक्षकशिक्षाप्रतिष्ठानानां शिक्षार्थिशिक्षकाः प्रशिक्षुताविद्यालयः(Internship School) इत्यस्य छात्रेण, शिक्षकेण, समाजेन(Local community) च सह स्थितिशील-परिस्थितौ स्वात्मानं नियोजयितुं शक्नोति। तेन प्रचलितशिक्षाव्यवस्थायां प्रशिक्षुता स्वात्मानं, विद्यार्थिनं, जनसमाजं च सम्यकरूपेण अनुभवितुम् अवसरं प्राप्नोति। विभागे एतादृशं पर्याप्ततया प्रायोगिकविद्यालयः(Lab school) इत्यस्य उपलब्धिः भवेत्। एतेन तेषाम् आवत्सरं पर्यवेक्षणस्य, परीक्षणस्य, परस्परम् अवबोधस्य तथ्यसङ्ग्रहस्य अवकाशः भवति।

(vi) विद्यालयप्रशिक्षुतायां सङ्घटनेन सह प्रारम्भिकशिक्षकस्य निर्माणे उभयोः युगपत् कर्तव्यभारः भवेत्। तत्र केन्द्रीयशिक्षकशिक्षानियन्त्रकः(Teacher Education Regulation at the central level) संराज्यशिक्षाविभागः (State Education Department), अनुमता संस्था(Affiliating Bodies), शिक्षकशिक्षाप्रतिष्ठानम् (Teacher Education Institution) किञ्च प्रशिक्षुताविद्यालयम्(Internship School)। एतानि प्रतिष्ठानानि भाविशिक्षकस्य अथवा प्रशिक्षणरतस्य शिक्षकस्य योग्यतानिर्णये निर्णायकानि भवन्ति। तत्र एवं प्रत्याशा क्रियते यत् पूर्वनिर्दिष्टं यत् युक्तगणतान्त्रिककर्तव्यं तत् पालयित्वा परस्परं मिलित्वा कार्यं कुर्यात्।

(vii) विद्यालयप्रशिक्षुतायां समयावधेः विविधेषु पर्यायेषु शिक्षार्थिशिक्षकेभ्यः प्रमाणपत्रप्रदानाय तेषां (student-teacher) कुशलतायाः मूल्याङ्कनम् (assessment) कर्तव्यं भवति। अनुमोदितासंस्थायाः यथा नियमाः सन्ति तदनुसारेणैव तस्य निर्माणं कर्तव्यम्। शिक्षार्थिशिक्षकस्य एतत् यत् मुल्याङ्कनं क्रियते तत् शिक्षकशिक्षाविभागेन Teacher Education Faculty, विद्यालयस्य प्रधानेन शिक्षकेण(School Principal) किञ्च उपदेष्टृशिक्षकैः(Mentor Teacher) कर्तव्यम्। मुल्याङ्कनप्रक्रियार्थं शिक्षकशिक्षाप्रतिष्ठानैः(Teacher Education Department) प्रशिक्षुताविद्यालयेभ्यः Internship Handbook of NCTE इति प्रदेयम्।

**विद्यालयप्रशिक्षुतायाः विविधसंस्थानां कर्तव्यसमूहः (Responsibilities of different Agencies for organization of school Internship) :**

**राष्ट्रियाध्यापकशिक्षापरिषद् (National Council for Teacher Education/NCTE)**

सुनिर्दिष्टकर्तव्यपालने बद्धः अस्ति। विद्यालयस्य प्रशिक्षुताधारेण NCTE शिक्षकपद्धतेः प्रवर्तनाय विस्ताराय च विविधसंस्थाभ्यः कर्तव्यकार्यप्रदानाय इ-नीतिं निर्धारयेत्।

**राष्ट्रियाध्यापकशिक्षापरिषदः(NCTE) भूमिका कर्तव्याश्च (Roles and Responsibilities: NCTE)**

- Formulate and notify Internship Policy (already given in Regulations 2014).
- Develop Internship Handbook for the use of Teacher Education Faculty, Student Teachers, School Principals and Mentor Teachers.
- Elaborate Internship Tasks and Assessment Framework in the Handbook.

**राज्यशिक्षाविभागः (State Education Department):**

यस्मिन् कस्मिंश्चित् राज्ये विद्यालयाः राज्यशिक्षाविभागस्य अधीने भवन्ति। राज्यशिक्षाविभागेन शिक्षकशिक्षायाः कर्मभारप्राप्तानां शिक्षाप्रतिष्ठानानां विषये तथ्यं सङ्गृह्य पर्यालोचनीयम्। NCTE Regulation, 2014 इत्यत्र स्थिरीकृतं यत् यदि शतं छात्राः प्रवेशं लब्धवन्तः सन्ति एतादृशस्य शिक्षकशिक्षाप्रतिष्ठानस्य कृते विद्यालयप्रशिक्षुतायै विद्यालयसंख्या भवति दश। दशसु प्रत्येकस्मिन् विद्यालये दश दश छात्राध्यापकाः प्रशिक्षुरूपेण प्रशिक्षणं स्वीकर्तुं शक्नुवन्ति।

**Roles and Responsibilities: State Education Department**

**State Level**

Maintain database of TEIs in the State.

Work out the requirement of Internship/Lab School @ 10 schools per 100 student-teachers (5 per 50 student-teachers).

Formulate internship policy of the state and issue guidelines for the District Education authorities concerning identification and monitoring of internship schools.

Compile monitoring reports received from the districts and forwards the consolidated report to the NCTE.

**District Level**

Prepare internship calendar in consultation with affiliation bodies.

Allocate schools to TEIs in the district.

Monitor internship periodically and send reports to the state headquarters.

**अनुमता संस्था (Affiliating Bodies)**

भारते प्रामाणिकाः विश्वविद्यालयाः एव स्नातकस्तरे शिक्षकशिक्षायाः कर्मसूचेः अनुमतिं ददति। किञ्च SCERT इति अथवा Board of School Education इति डिप्लोमा इति स्तरे विद्यमानायाः शिक्षकशिक्षायाः कर्मसूचेः अनुमतिं ददति।अनुमताः संस्थाः परीक्षायाः विविधकर्तव्यकर्मसूचिविषये निर्देशं ददति। शिक्षकशिक्षायाः कर्मसूचौ तेषां प्रशिक्षुताविषये सुनिर्दिष्टः निर्देशः स्थिरतया तिष्ठति।

**Roles and Responsibilities: Affiliating Bodies**

| |
|---|
| Prepare a calendar of School internship in consultation with the state education department.<br><br>Develop, Notify and circulate the scheme of evaluation for the internship component.<br><br>Suggest procedures to be followed by TEIs and internship school for assessing student-teachers performance.<br><br>Undertake periodical monitoring of TEIs (along with DEOs) and of internship and send consolidated report to NCTE. |

### अध्यापकशिक्षाप्रतिष्ठानम् (Teacher Education Institution)

अध्यापकशिक्षाप्रतिष्ठानानि अध्यापकशिक्षायाम् अन्तर्भूतायाः प्रशिक्षुतायां कर्मसूचिविषये अत्यन्तं गुरुत्वम् आवहन्ति। NCTE इत्यस्य नीतिम् अनुसृत्य प्रशिक्षुतायां दायित्वग्रहणम्, अनुमतायाः संस्थायाः नियमानुसारं परीक्षायाः सम्पादनम्, राज्यसर्वकारस्य प्रशिक्षुता अनुसूची(Internship Schedule) इत्यनुसारं शिक्षकशिक्षायाः नीतेः परिकल्पनायाश्च परिपालनाय सर्वं व्यवस्थाप्यते। शिक्षकशिक्षाप्रतिष्ठानैः सर्वदा प्रायोगिकविद्यालयः(Lab school) किञ्च Mentor-teacher इत्येतैः सह सम्पर्कं संस्थाप्य एव कार्यं कर्तव्यम्। शिक्षकशिक्षाप्रतिष्ठानानि प्रशिक्षुता संङ्गठनाय प्रायोगिकविद्यालयः(Lab school) इत्यस्य प्रधानशिक्षकस्य किञ्च Mentor Teacher इत्येषां प्रशिक्षणकर्मसूचेः(orientation programme) कर्तव्यभारं स्वीकुर्युः। शिक्षकश्क्षिाप्रतिष्ठानानि NCTE इत्यनेन प्रस्तूतम् Handbook on school Internship इत्यस्मिन् विषये प्रशिक्षुताविद्यालयः(Internship School) इत्येतैः सह विस्तरेण आलोचनां कुर्युः।

**Roles and Responsibilities: Teacher Education Institution**

| |
|---|
| Provide Internship Handbooks to the internship schools.<br><br>Organise orientation-cum-consultation meetings with the school principals and mentors' teachers.<br><br>Develop supplementary material for additional activities in collaboration with mentor teachers.<br><br>Hold fortnightly review meetings with mentor teachers.<br><br>Hold follow-up meetings with student-teachers at regular intervals in the TEI.<br><br>Monitor implementation of internship including observation of practice teaching.<br><br>Assess, in collaboration with school mentor-teachers, the internship performance of student-teachers. |

### प्रशिक्षुताविद्यालयः अथवा प्रायोगिकविद्यालयः (Internship School/Lab-school)

यः विद्यालयः राज्यशिक्षाविभागेन प्रशिक्षुताविद्यालयः(Internship School) प्रायोगिकविद्यालयः(Lab School) इत्येवंरूपेण स्वीकृतः भवति तस्य कर्तव्यं भवति यत्- स्वात्मानं शिक्षकशिक्षाप्रतिष्ठानस्य Extension centre

इत्येवंरूपेण उन्नीतं कुर्यात् इति। अस्य प्रायोगिकविद्यालयः(Lab School) इत्यस्य ये शिक्षकाः Mentor Teacher इत्येवंरूपेण चिताः भवन्ति तेषां कर्तव्यं भवति विद्यालयसम्बद्धेन शिक्षकशिक्षाप्रतिष्ठानेन आयोजिते orientation workshop इत्यत्र भागं गृहीत्वा स्वसमृद्धिकरणम्। येन ते शिक्षाप्रशिक्षोः कर्तव्यसूचेः सम्यक्तया पालनं कर्तुं शक्नुयुः। Mentor Teacher सर्वदा शिक्षार्थीशिक्षकाणां तत्त्वावधानं कुर्युः किञ्च प्रसङ्गे प्रयोजने सति तेभ्यः परामर्शप्रदानमपि कुर्युः। सामाजिककार्य-करणसमये ते शिक्षर्थीशिक्षकाणां कार्ये साहाय्यमपि तैः कर्तव्यम्।

**Roles and Responsibilities: Internship/Lab School**

| |
|---|
| Identify well-qualified and adequately-motivated teachers to be associated with TEIs as mentor teachers.<br><br>Depute the mentor-teachers to participate in the orientation meetings in the TEI.<br><br>Make available all school facilitates to the student-teachers such as library, laboratories, playgrounds etc.<br><br>Permit the student-teachers to participate and contribute in all activities of the school such as school assembly, cultural activities, PTA meetings, games, inter-house competitions, etc., and guide in the subject practice teaching by Student-teachers.<br><br>Participate in the assessment of students' performance.<br><br>Address promptly the problems and difficulties of student-teachers. |

**प्रशिक्षुताकाले छात्राध्यापकस्य कर्तव्यं कार्यावलिः वा (Student Teachers' Tasks during Internship)**

प्रशिक्षुताविद्यालयः(Internship School) इत्यत्र प्रशिक्षुताकाले छात्राध्यापकैः विविधेषु कार्येषु भागग्रहणं कर्तव्यम्। एतेषु विद्यालयस्य कार्येषु वर्गशिक्षणं(classroom teaching), वर्गव्यवस्थापनम्(classroom-management), विद्यालयस्य समाजस्य वा कार्याय सङ्घटनम्(organization of school based and community based activities) इत्यादीनि अन्तर्भवन्ति। कार्यग्रहणात् परं शिक्षार्थिशिक्षकैः तेषु कार्येषु ज्ञानस्य, दक्षतायाः विकासः कर्तव्यः। NCTE इत्यस्य Guide line इत्यत्र निम्नलिखितानि कार्याणि निर्दिष्टानि सन्ति-

1) प्रशिक्षुताविद्यालयः)Internship School( किञ्च तस्य पार्श्वस्थजनसमाजस्य उपलब्धिः।

2) विद्यालयस्य पाठ्यसूचेः पाठ्यपुस्तकस्य च विश्लेषणम्।

3) विद्यालयस्य अभिज्ञैः शिक्षकैः नियमेन वर्गशिक्षणस्य पर्यवेक्षणम्।

4) बन्धुशिक्षार्थिशिक्षकस्य वर्गशिक्षणस्य पर्यवेक्षणम्।

5) प्रशिक्षुताविद्यालयः)Internship School( इत्यस्य विस्तरेण विवरणं किञ्च गृहीतानां नूतनां कार्याणां परिचयः।

6) पाठस्य परिकल्पनं किञ्च पाठ्यांशस्य परिकल्पनम्।

7) विद्यालये पाठ्यते एतादृशम् एकं, द्वयं वा विषयम् आदाय पाठ्यानुसारं वर्गे शिक्षाप्रदानम्।

8) अध्यापनशिक्षायाः सम्पदः संरक्षणं विकाससाधनञ्च।

9) प्रश्नपत्रस्य किञ्च मुल्याङ्कनविषये अन्येषाम् उपकरणानाम् आयोजनम्।

10) संशोधनमूलकस्य शिक्षणस्य(Remedial teaching) निर्माणाय कर्तव्यानां निर्माणम्।

11) कस्यचित् शिशुविद्यार्थिनः व्यक्तिवृत्तान्तस्य अध्ययनम्(case study) ग्रहणञ्च।

12) विद्यालयस्य काञ्चित् समस्याम् आदाय क्रियात्मकानुसन्धानं प्रकल्पः(Action research project) इत्यस्य ग्रहणम्।

13) सामाजिकस्य अथवा गणीयकार्यस्य(Community work) सम्पादनं किञ्च समाजस्य(community survey) समीक्षणम्।

14) काञ्चित् चितां भावनाम्(selected theme) आश्रित्य term paper इत्यस्य निर्माणम्।

**निष्कर्षः(Conclusion)**

अस्मिन् प्रसङ्गे उक्तं यत् शिक्षकशिक्षाप्रतिष्ठानानि(Teacher Education Institution) किञ्च प्रशिक्षुताविद्यालयः(Internship School) इति तेषां स्वाकाङ्क्षाधारेण अधिककार्यसम्पादनाय ते परामर्शं निर्देशं च दातुं शक्नुवन्ति। पाठ्यस्य परिकल्पनाय पाठ्ये येषाम् अध्यायाः अथवा unit इत्येतेषां चयनं भविष्यति तेषाम् अवश्यं प्रशिक्षुताविद्यालयः(Internship School) इत्यस्य वार्षिकशिक्षायाः परिकल्पनानुसारं चिताः भवेयुः। अत्र ध्यानं देयं यत् प्रशिक्षुताविद्यालयः(Internship School) इत्यस्य कार्यक्रमस्य विघातः यथा न स्यात्।

साम्प्रतिककाले समग्रदेशे शिक्षाशास्त्रिपाठ्यक्रमे आमूलाग्रं परिवर्तनं जातम्। सर्वोऽपि शिक्षणाभ्यासपाठ्यक्रमः अपेक्षितशिक्षणा-भ्यासकौशलानि अभ्यासयितुं यतन्ते। वर्षद्वयस्य शिक्षणाभ्यासस्य सम्प्रत्ययः भवति यत् अध्यापकशिक्षा सर्वेषां शिक्षणसंस्थानां शिक्षायाः आन्तरिकभागः भवति। शिक्षायाः साफल्यं शिक्षणगुणवत्तायाम् अन्तर्भवति यच्च जीवने सर्वत्र उत्कर्षतामापादयति। शिक्षायाः गुणवत्ता शिक्षकचरित्रस्य व्यक्तित्वस्य च उपरि आधारिता भवति।

1) विद्यालयप्रशिक्षुतायां प्रधानं लक्ष्यं छात्राध्यापकानां शिक्षणकौशलानां विकासः।

2) वास्तविकजगतः अभिज्ञानार्थं विद्यालयप्रशिक्षुता एकः मार्गः।

3) सैद्धान्तिक-व्यवहारिकज्ञानाय विद्यालयप्रशिक्षुता उपकरोति।

4) विश्लेषणं, क्रियान्वयनं, पाठयोजनानिर्माणं, शिक्षणशैलीश्च पर्यवेक्षकमार्गदर्शनेन संवर्धयितुं शक्यन्ते।

5) छात्राध्यापकाः विद्यालयप्रशिक्षुतया जीवने तेषां स्वीयपात्रं, उत्तरदायित्वञ्च ज्ञातुम् अर्हन्ति।

6) अध्ययनमिदं कौशलसम्पादने ज्ञानार्जनाय अपेक्षिताभिवृत्तिनिर्माणे च समुपकरोति।

7) अध्ययनमिदं शैक्षिकनियोजकानां कृते उपकरोति।

8) पर्यवेक्षकाणां विशेषावधानं, छात्राध्यापकानां विशिष्टव्यक्तित्वाय परिणमते।

**<u>Reference (सन्दर्भग्रन्थसूची)</u>**

1) मिश्रः नागेन्द्रः हर्षनाथ.(1995). अनुसन्धानस्य प्रविधिप्रक्रिया. नई दिल्ली: राष्ट्रियसंस्कृतसंस्थानम् .

2) झा मदनमोहन ,पाण्डे गोविन्दः.(2005 ). शैक्षिकप्रबन्धकुसुमाकरः. पुरी : राष्ट्रियसंस्कृतसंस्थानम्. सदाशिवपरिसरः.

3) Naik S. P. (2004). 'Education for Twenty First century'. New Delhi : Anmol Publication Pvt. Ltd.

4) Smith and Harrison. (1990). ‘Principles of Class Teaching’. London : Macmillon & Co Ltd.

5) Dash keshab Chandra. (1992). ‘Elements of Research Methodology in Sanskrit’. Varanasi : Chaukambha Sanskrit Sansthan.

**Reports**

6) National Curriculum Framework for Teacher Education (NCFTE-2009).

7) School Internship: Framework and Guidelines (NCTE) - January, 2016.

**Citation:** **Jana. A. K.,** (2025) “शिक्षणसन्दर्भे विद्यालयप्रशिक्षुतायाः आवश्यकता”, *Bharati International Journal of Multidisciplinary Research & Development (BIJMRD)*, Vol-3, Issue-01, January-2025.